७५. जात्यन्धकोटिनियुतान्यविनायकानां
मार्गे अकोविदु कुतो नगरप्रवेशे।
विन प्रज्ञ पञ्च इमि पारमिता अचक्षुः
अविनायका न प्रभवन्ति स्पृशेतु बोधिम्॥१॥

७६. यत्रान्तरस्मि भवते प्रगृहीत प्रज्ञा
ततु लब्धचक्षु भवती इमु नामधेयम्।
यथ चित्रकर्मपरिनिष्ठित चक्षुहीनो
न च ताव पुण्यु लभते अकरित्व चक्षुः॥२॥

७७. यद् धर्म संस्कृत असंस्कृत कृष्णशुक्लो
अणुमात्रु नो लभति प्रज्ञ विभावमानः।
यद प्रज्ञपारमित गच्छति संख्य लोके
आकाश यत्र न प्रतिष्ठितु किंचि तत्र॥३॥

७८. सचि मन्यते अहु चरामि जिनान प्रज्ञां
मोचिष्य सत्त्वनियुतां बहुरोगस्पृष्टान्।
अयु सत्त्वसंज्ञपरिकल्पकु बोधिसत्त्वो
न च एष प्रज्ञवरपारमिताय चर्या॥४॥

७९. यो बोधिसत्त्व वरपारमितेति चीर्णो
परिचारिका य न च काङ्क्षति पण्डितेहि।
सह श्रुत्व तस्य पुन भेष्यति शास्तृसंज्ञा
सो वा लघू अनुबुधिष्यति बोधि शान्ताम्॥५॥

८०. सत्कृत्य बुद्धनियुतां परिचारिकायां

न च प्रज्ञपारमित श्रद्दधिता जिनानाम्।

श्रुत्वा च सो इमु क्षिपिष्यति सोऽल्पबुद्धिः

स क्षिपित्व यास्यति अवीचिमत्राणभूतो॥६॥

८१. तस्मा हु श्रद्दधत एव जिनान मातां

यदि इच्छथा स्पृशितु उत्तमबुद्धज्ञानम्।

सो वाणिजो यथ व्रजित्वन रत्नद्वीपं

मूलातु छेदन करित्व पुन आगमेया॥७॥

भगवत्यां रत्नगुणसंचयगाथायां निरयपरिवर्तो नाम सप्तमः॥

८२. रूपस्य शुद्धि फलशुद्धित वेदितव्या
फलरूपशुद्धित सर्वज्ञतशुद्धिमाहुः।
सर्वज्ञताय फलशुद्धित रूपशुद्धी
आकाशधातुसमताय अभिन्नछिन्नाः॥ १॥

८३. त्रैधातुकं समतिक्रान्त न बोधिसत्त्वा
क्लेशापनीत उपपत्ति निदर्शयन्ति।
जरव्याधिमृत्युविगताश्च्युति दर्शयन्ति
प्रज्ञाय पारमित यत्र चरन्ति धीराः॥ २॥

८४. नामेव रूपि जगती अयु पङ्कसक्ता
संसारचक्रि भ्रमतेऽनिलचक्रतुल्ये।
जानित्व भ्रान्तु जगती मृगवागुरेव
आकाश पक्षिसदृशा विचरन्ति प्रज्ञाः॥ ३॥

८५. रूपस्मि यो न चरते परिशुद्धचारी
विज्ञान संज्ञ अपि वेदन चेतनायाम्।
एवं चरन्तु परिवर्जयि सर्वसङ्गां
सङ्गाद्विमुच्य चरते सुगतान प्रज्ञाम्॥ ४॥

भगवत्यां रत्नगुणसंचयगाथायां विशुद्धिपरिवर्तो नामाष्टमः॥

९

८६. एवं चरन्तु विदु पण्डितु बोधिसत्त्वो

सङ्गा उछिन्नु व्रजते जगती असक्तो।

सूर्यो व राहुग्रहमुक्त विरोचमानो

अग्नीव युक्त तृणकाष्ठवनं दहाति॥ १॥

८७. प्रकृतीय शुद्ध परिशुद्धिमि सर्वधर्मां

प्रज्ञाय पारमित पश्यति बोधिसत्त्वो।

न च पश्यकं लभति नापि च सर्वधर्मान्

एषा स प्रज्ञवरपारमिताय चर्या॥ २॥

भगवत्यां रत्नगुणसंचयगाथायां स्तुतिपरिवर्तो नाम नवमः॥

८८. शक्रो जिनस्य परिपृच्छति देवराजो
चरमाण प्रज्ञ कथ युज्यति बोधिसत्त्वो।
अणुमात्र यो न खलु युज्यति स्कन्धधातौ
यो एव युज्यति (स युज्यति) बोधिसत्त्वः॥१॥

८९. चिरयानप्रस्थितु स वेदयितव्य सत्त्वो
बहुबुद्धकोटिनयुतेहि कृताधिकारो।
यो श्रुत्व धर्मि इमि निर्मितमायकल्पां
न च काङ्क्षते अयु प्रयुज्यति शिक्षमाणः॥२॥

९०. कान्तारमार्गि पुरुषो बहु(भी)जनेहि
गोपाल सीम वनसंपद् पश्यते यो।
आश्वासप्राप्त भवती न च तस्य त्रासो
अभ्याश ग्रामनगराण इमे निमित्ताः॥३॥

९१. एमेव प्रज्ञवरपारमिता जिनानां
श्रृणु तात यो लभति बोधि गवेषमाणः।
आश्वासप्राप्त भवती न च तस्य त्रासो
नार्हन्तभूमि न पि प्रत्ययबुद्धभूमी॥४॥

९२. पुरुषो हि सागरजलं व्रजि पश्यनाय
सचि पश्यते द्रुमवनस्पतिशैलराजम्।
अथवा न पश्यति निमित्त निकाङ्क्ष भोति
अ(भ्याश)तो महसमुद्र न सोऽतिदूरे॥५॥

९३. एमेव बोधिवरप्रस्थितु वेदितव्यो

श्रुणमाण प्रज्ञ इमि पारमिता जिनानाम्।

यद्यापि संमुख न व्याकृतु नायकेनो

तथपि स्पृशिष्यति नचिरेण हु बुद्धबोधिम्॥ ६॥

९४. सुवसन्ति कालि पतिते तृणपत्रशाखा

नचिरेण पत्रफलपुष्प समागमन्ति।

प्रज्ञाय पारमित यस्यिमु हस्तप्राप्ता

नचिरेण बोधिवर प्राप्स्यति नायकानाम्॥ ७॥

९५. यथ इस्त्रि गुर्विणि य चेष्टति वेदनाभि

ज्ञातव्यु कालु अयमस्य प्रजायनाय।

तथ बोधिसत्त्व श्रुणमाणु जिनान प्रज्ञां

रति छन्द वीक्षति स्पृशिष्यति बोधि शीघ्रम्॥ ८॥

९६. चरमाणु प्रज्ञवरपारमिताय योगी

न च रूपवृद्धि न च पश्यति पारिहाणिम्।

धर्मा अधर्म इमु पश्यति धर्मधातुं

न च निर्वृतिं स्पृशति सो विहराति प्रज्ञाम्॥ ९॥

९७. चरमाणु यो न इह कल्पयि बुद्धधर्मां

बल ऋद्धिपाद न च कल्पयि बोधि शान्ताम्।

अविकल्पकल्पविगतो अधिष्ठानचारी

एषा स प्रज्ञवरपारमिताय चर्या॥ १०॥

भगवत्यां रत्नगुणसंचयगाथायां धारणीगुणपरिवर्तो नाम दशमः॥